# ॥ श्रीगुरुभजनस्तोत्रम् ॥

कलाभिः कल्पिताशेष-भुवनानन्दभोजनम् ।
क्रीडन्तं त्रिपुरे नित्यं परसंविद्गुरुं भजे ॥ १ ॥

हर्यांकारं हराकारं ह्रींङ्कारं वाम्बिकातनुम् ।
हृदयेऽद्वैतमात्मानं द्योतयन्तं गुरुं भजे ॥ २ ॥

शिवप्रियं च रुद्राक्षं गले भाले त्रिपुण्ड्रकम् ।
करे संविन्मयीं मुद्रां धारयन्तं गुरुं भजे ॥ ३ ॥

काषायवसनोपेतं करुणार्द्रविलोचनम् ।
कामारिसेवनासक्तं कल्मषघ्नं गुरुं भजे ॥ ४ ॥

श्रितार्तिभेदनोद्युक्तं शर्मदं शमशोभितम् ।
श्रुत्यन्तवाक्यमनिशं श्रावयन्तं गुरुं भजे ॥ ५ ॥

संशयोच्छेदने दक्षं रक्षिताचार्यसन्ततिम् ।
स्वनाथ-करपाथोज-सञ्जातं सद्गुरुं भजे ॥ ६ ॥

दीक्षितं शिष्यमोक्षार्थे साक्षात्कृतमहत्पदम् ।
दक्षिणामुखदेवांशं ब्रह्मनिष्ठं गुरुं भजे ॥ ७ ॥

ग्रन्थिं भित्त्वा विनिर्यान्तं वर्षन्तं गगनेऽमृतम् ।
कोटिविद्युत्प्रतीकाशं शक्तिपुञ्जं गुरुं भजे ॥८॥

जनयित्वा निजानन्दे रक्षित्वा मां क्षणे क्षणे ।
पाययन्तं भक्तिरसं मातृभूतं गुरुं भजे ॥९॥

अनन्यभावनागम्यं अभयं ज्योतिरान्तरम् ।
इच्छाज्ञानक्रियामूलं आत्मरूपं गुरुं भजे ॥१०॥

देशिकेश्वरपश्चादि भेदशून्यं चिदम्बरम् ।
देशकालानवच्छिन्नं निर्विकल्पं गुरुं भजे ॥११॥

मज्जन्मजन्मसाफल्यम् अहो जातमयत्नतः ।
यदङ्घ्रिरेणुसंस्पर्शात् तमानन्दं गुरुं भजे ॥१२॥

श्रीगुरुद्वादशात्मानं ध्यात्वा स्तोत्रमिमं पठेत् ।
साधकोत्तमः संविद् दृष्टिसौष्ठवहेतवे ॥